# संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)
## आदर्श-प्रश्नपत्रम्
## कक्षा - दशमी (2025-26)

**अवधिः - होरात्रयम्** **अङ्कयोजना उत्तरसङ्केताश्च** **पूर्णाङ्काः - 80**

**अवधातव्यम् -**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्। **(अयं नियमः नवम्यां कक्षायाम् अपि पालनीयः।)**
3. गद्यांशे श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

| | | |
|---|---|---|
| | **‘क’ भागः**<br>**अपठितावबोधनम् (10 अङ्काः)** | |
| 1. | **गद्यांशः**<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) जनानाम्<br>(ii) कर्तव्यपालनम्<br>(iii) कर्तव्यम्<br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) यदा वयं परिश्रमपूर्वकं श्रद्धापूर्वकं च स्वकर्तव्यानि पालयामः तदा देशस्य उन्नतिः भवितुम् अर्हति। | 2×1=2<br><br><br><br><br>2×2=4 |

| | | |
|---|---|---|
| | (ii) कर्तव्यानां पालनं मनुष्यस्य व्यक्तिगतहिताय देशहिताय च परमावश्यकं भवति।<br>(iii) अद्यत्वे जनाः अल्पेन एव प्रयासेन कार्यसिद्धिम् इच्छन्ति।<br>इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।<br>**कर्तव्यपालनम् अथवा अन्यत् किमपि उचितं शीर्षकम्।**<br>छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितं मूल्याङ्कनं करणीयम्।<br>ई. यथानिर्देशम् उत्तरत -<br>(i) (घ) अस्ति<br>(ii) (क) प्रयतन्ते<br>(iii) (ख) अल्पेन | 1<br><br><br>3×1=3 |
| | **भागः 'ख'**<br>**रचनात्मकं कार्यम्** | |
| 2. | पत्रलेखनम्<br>भवत्याः नाम शर्वाणी। भवत्याः सखी प्रज्ज्वला संस्कृतं पठितुं भवत्याः परामर्शं वाञ्छति। तां प्रेरयितुं लिखितं पत्रं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पत्रम् उत्तरपुस्तिकायां लिखतु -<br>डी-401, जनकपुरी<br>(i) **नवदिल्लीतः**<br>दिनाङ्कः ---------------<br>प्रिय (ii) **प्रज्ज्वले !**<br>सस्नेहं नमस्ते।<br>अत्र कुशलं तत्रास्तु। आशासे त्वम् अपि कुशलिनी स्यात्। भवत्याः पत्रं प्राप्तम्। भवती संस्कृतभाषां पठितुम् इच्छति (iii) **इति** पठित्वा मम प्रसन्नतायाः सीमा नास्ति। एषा भाषा सर्वाधिका (iv) **वैज्ञानिकी** अस्ति। संस्कृतम् अस्माकं देशस्य प्रतिष्ठा वर्तते। वेदाः, उपनिषदः, रामायणं, महाभारतं, पुराणानि, महाकाव्यानि, कथासाहित्यम् इत्यादिकं सर्वं (v) **वाङ्मयम्** अत्यन्तं मार्गदर्शकं, ज्ञानवर्धकं प्रेरणाप्रदं च अस्ति। यथा पुष्पेभ्यः सुगन्धः पृथक् कर्तुं न शक्यते तथैव भारतीयसंस्कृतेः संस्कृतभाषां पृथक् (vi) **कर्तुं** न शक्यते। संस्कृतेन सम्भाषणम् अस्माकं हृदयेषु (vii) **गौरवं** वर्धयति, हीनभावनां च नाशयति। अतः त्वम् अवश्यं (viii) **संस्कृतं** पठ, पठित्वा च अस्याः भाषायाः (ix) **प्रचारं** कुरु। एवं वयं भारतमातुः सेवां कृत्वा धन्याः भवामः।<br>सर्वेभ्यः अग्रजेभ्यः मम प्रणामाः अनुजेभ्यः च आशीर्वादाः।<br>भवत्याः सखी,<br>(x) **शर्वाणी** | 10×½=5 |

| | | |
|---|---|---|
| | | |
| 3. अ<br><br><br><br><br><br><br><br>आ | **चित्रवर्णनम्**<br>अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। **अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति।** वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते।<br>**अथवा**<br>**अनुच्छेदलेखनम्**<br>अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः। | 5×1=5 |
| | | |
| 4. अ | **संवादपूर्तिः**<br>**छात्राः -** **(i) आचार्य! प्रणमामः।**<br>**आचार्यः -** स्वस्ति, यशस्विनः भवत।<br>**आरुषः -** मया श्रुतं यत् श्वः आरभ्य सद्यस्कमाध्यमेन (ऑनलाइन) कक्षा भविष्यति, किमर्थम्?<br>**आचार्यः -** **(ii) भवन्तं कः असूचयत्?**<br>**मोहितः -** अस्माकं कक्षाध्यापिका चर्चायां सामान्यरूपेण अकथयत् यत् कदाचित् श्वः आरभ्यः गृहात् एव कक्षा स्वीकरणीया भवेत् इति।<br>**आचार्यः -** भवतां कक्षाध्यापिका सम्यक् सूचितवती। ह्यः वायुगुणवत्ता-सूचकाङ्कः महतीं वृद्धिं प्राप्नोत् तस्मात् सर्वकारः जनानां स्वास्थ्यरक्षणाय सद्यस्कमाध्यमेन गृहात् एव पठितुं कार्यं कर्तुं च निर्देशम् अयच्छत्।<br>**नव्या -** **(iii) महोदय! गृहे मनः न रमते, अत्रैव वयं पठने आनन्दम् अनुभवामः**<br>**आचार्यः -** सत्यं कथयति, वयं शिक्षकाः अपि साक्षात् कक्षायाम् आगत्य पाठयितुम् इच्छामः।<br>**भूमिका -** **(iv) पुनः कदा विद्यालये एव कक्षा भविष्यति?**<br>**आचार्यः -** इदानीं तु ईश्वरः एव जानीयात्। यदा प्रदूषणस्य निवारणाय प्रकृतेः च संरक्षणाय वयं जागरूकाः भविष्यामः तदा एव अग्रे एतादृशी विकटा स्थितिः नैव आगमिष्यति।<br>**छात्राः -** वयं प्रणं कुर्मः यत् वयं पर्यावरण-रक्षणाय निरन्तरं प्रयासरताः भविष्यामः।<br>**आचार्यः -** **(v) सत्यं, तदैव इयं वसुन्धरा सुरक्षिता भविष्यति।** | 5×1=5 |

| | | |
|---|---|---|
| आ | **अथवा**<br>**कथापूर्तिः**<br>एकः मृत्तिका-घटः आसीत्। (i) **घटस्य** उपरि स्थितः शरावः यः घटस्य मुखम् आच्छादयति सः एकदा घटम् अपृच्छत् - मित्र घट! मम (ii) **मनसि** एकः प्रश्नः अस्ति। इदानीं (iii) **घर्मकालः** अस्ति। यत् किमपि पात्रं यदा भवतः समीपम् आगच्छति तदा भवान् तत्पात्रं (iv) **शीतलेन** जलेन परिपूरयति। तानि सर्वाणि पात्राणि जलं स्वीकृत्य तृप्तानि भवन्ति। भवन्तम् एकाकिनं विहाय दूरं गच्छन्ति। (v) **तानि** स्वार्थपरायणानि सन्ति, तथापि भवान् तेभ्यः शीतलं जलं प्रदाय तेषु (vi) **अनुग्रहं** करोति। अहं सर्वदा भवता सह एव तिष्ठामि कदापि भवन्तं (vii) **त्यक्त्वा** कुत्रापि न गच्छामि परन्तु भवान् मह्यं कदापि बिन्दुमितम् अपि जलं न यच्छति, किमर्थम्? तदा स्मितं कुर्वन् घटः (viii) **मन्दस्वरेण** अवदत् - एतस्य कारणं भवतः प्रकृतिः अस्ति। तानि सर्वाणि पात्राणि शिरः अवनम्य जलं याचन्ते अहञ्च तेषाम् इच्छां पूरयामि परं भवान् तु सर्वदा मम (ix) **शिरसि** एव तिष्ठति तर्हि कथम् अहं भवते जलं दद्याम्? भवान् अपि शिरः अवनम्य (x) **जलार्थं** याचनां करोतु अहं भवन्तम् अपि निराशं न करिष्यामि। | 10×½=5 |
| | | |
| | **भागः 'ग'**<br>**अनुप्रयुक्तव्याकरणम्** | |
| 5. अ | **सन्धिः सन्धिच्छेदश्च**<br>(i) तप उच्यते।<br>(ii) गात्रेषु + अपि<br>(iii) पञ्चम<br>(iv) सङ्गः + तेषु | 4×1=4 |
| आ | **अथवा**<br>**सन्धिः सन्धिच्छेदश्च**<br>(i) केचिद् दग्धाः<br>(ii) युधिष्ठिरः + च<br>(iii) वायोरिव<br>(iv) अरुणाचले + अस्मिन्। | |
| | | |
| 6. | **समस्तपदं विग्रहः च**<br>(i) (घ) निवासाय योग्या<br>(ii) (ग) दम्पती | 4×1=4 |

| | | |
|---|---|---|
| | (iii) (ख) स्नेहेन सहितम्<br>(iv) (क) असन्तुष्टः | |
| | | |
| 7. | प्रत्ययाः<br>(i) (क) दानवीरताम्<br>(ii) (ग) मन्दभाग्य + टाप्<br>(iii) (ख) दृश् + अनीयर्<br>(iv) (घ) भग + मतुप् | 4×1=4 |
| | | |
| 8. अ<br><br><br><br><br><br><br>आ | वाच्यम्<br>**माहिका** - भूमिके! **(i) त्वं** किं लिखसि?<br>**भूमिका** - माहिके! मया श्लोकाः लिख्यन्ते।<br>**माहिका** - त्वं कान् **(ii) श्लोकान्** लिखसि ?<br>**भूमिका** - मया नीतिश्लोकाः लिख्यन्ते। त्वया अधुना किं **(iii) क्रियते** ?<br>**माहिका** - अहं संस्कृतकथां पठामि।<br>अथवा<br>(i) पिता पुत्राय क्रीडनकं (दा) **ददाति / यच्छति।**<br>(ii) शताक्ष्या **<u>गीतानि</u>** (गीत) श्रूयन्ते।<br>(iii) **अध्यापकेन /अध्यापकाभ्याम्/ अध्यापकैः** (अध्यापक) छात्राः पाठ्यन्ते। | 3×1=3 |
| | | |
| 9. | समयः<br>(i) सार्ध-पञ्चवादने<br>(ii) सपाद-द्वादशवादनपर्यन्तम्<br>(iii) पादोन-सप्तवादने | 3×1=3 |
| | | |
| 10. | अव्ययपदानि<br>(i) यथा<br>(ii) च<br>(iii) इति<br>(iv) तु | 4×1=4 |
| | | |
| 11. | अशुद्धिसंशोधनम्<br>(i) (ग) प्रवहन्ति<br>(ii) (ख) प्रतिष्ठितम् | 3×1=3 |

| | | |
|---|---|---|
| | (iii) (क) त्वम् | |
| | **भागः 'घ'**<br>**पठितावबोधनम्** | |
| 12. | अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -<br>I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) कर्मपुरनगरे / कर्मपुरनाम्नि नगरे<br>(ii) दुष्टबुद्धिना<br>(iii) उद्दण्डः<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) उद्दण्डः बालकः अकथयत् - अयि भो ! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ ? अपि इदं श्रेयस्करम् ?<br>(ii) अथ व्रजन्तौ तौ मार्गे क्रीडतः बालकान् दृष्ट्वा अवदताम् - यदि कश्चित् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्।<br>(iii) प्रच्छन्नभाग्यः बाल्ये वयसि विद्यापराङ्मुखः स केनचित् दुष्टबुद्धिनाम्ना चौरेण सह चौर्यकर्मणि निरतः सञ्जातः।<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) बालकः<br>(ii) अनुभवेत्<br>अथवा<br>(आ) निर्देशानुसारम् उत्तरत -<br>(i) परित्यज्य<br>(ii) मार्गे | 5<br>2×½=1<br><br><br><br>2×1=2<br><br><br><br><br><br>2×1=2 |
| | | |
| 13. | पद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -<br>I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) अवक्रता<br>(ii) आचारः<br>(iii) सदाचारम्<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।<br>(ii) यथा चित्ते अवक्रता तथा यदि वाचि भवेद् तदेव समत्वं भवति।<br>(iii) सदाचारं प्राणेभ्योऽपि विशेषतः रक्षेत्।<br>III. (अ) निर्देशानुसारम् उत्तरत - | 5<br>2×½=1<br><br><br>2×1=2<br><br><br><br>2×1=2 |

| | | |
|---|---|---|
| | (i) आहुः<br>(ii) अवक्रता<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>(i) प्रथमः<br>(ii) वाचि | |
| | | |
| 14. | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) काकः<br>(ii) कृष्णः<br>(iii) नेपथ्ये<br>**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) राजहंसः राजहंसीं पृच्छति - अये! किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः 'का का' शब्दैः वातावरणम् आकुलीक्रियते? इति<br>(ii) काकः सक्रोधं वदति -आः किम् उक्तवती भवती? यदि अहं कृष्णवर्णः तर्हिश्री रामस्य वर्णः कीदृशः ? श्रीवासुदेवस्य वर्णः कीदृशः ? मुग्धे अहं तु अतीव कर्तव्यपरायणः। प्रभाते 'का का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि इति।<br>(iii) राजहंसी भर्तारम् उत्तरति - भर्तः! काकात् अन्यः को भवितुमर्हति ? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम्। मेध्यम् अमेध्यं सर्वमेव भक्षयति। कर्णकटुशब्दैः ...इति।<br>**III. (अ) निर्देशानुसारम् उत्तरत -**<br>(i) मेध्यम्<br>(ii) कुक्कुटः<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>(i) वर्णः<br>(ii) करोति | 5<br>2×½=1<br><br><br><br><br>2×1=2<br><br><br><br><br><br><br>2×1=2 |
| | | |
| 15. | **प्रश्ननिर्माणं कुरुत -**<br>(i) **<u>कीदृशं</u>** वाक्यं वाङ्मयं तपः उच्यते?<br>(ii) कामः एव **<u>केषां</u>** शत्रुः?<br>(iii) गगनात् सहस्रशः **<u>काः</u>** भूमौ पतन्ति?<br>(iv) अरुणाचलप्रदेशे अनेके **<u>के</u>** मान्यन्ते?<br>(v) **<u>कुत्र / कासु</u>** विचरन् राजा अचिन्तयत्? | 5×1=5 |

| | | |
|---|---|---|
| | | |
| 16.अ<br><br><br><br>आ | **अन्वयपूर्तिः**<br>**अन्वयः -** शुश्रूषा (i) **श्रवणम्** च एव, ग्रहणम् तथा (ii) **धारणम्**, ऊह-अपोह-अर्थविज्ञानम्, (iii) **तत्त्वज्ञानम्** च (iv) **धीगुणाः** (सन्ति)।<br>**अथवा**<br>**भावार्थपूर्तिः**<br>**भावार्थः -** हे महाबाहो! अत्र संशयः नास्ति यत् एतत् (i) **मनः** अतीव चञ्चलम् अस्ति। इदं (ii) **बहुकष्टेन** नियन्त्रितं भवति परन्तु यदि वयं पुनः पुनः (iii) **अभ्यासं** कुर्मः, विरक्ताः च भवामः तदा निश्चयेन एतत् वशीकर्तुं (iv) **शक्नुमः**। | 4×½=2 |
| | | |
| 17. | **प्रसङ्गानुकूलम् उचितार्थचयनम्**<br>(i) (ग) उद्गमस्थलम्<br>(ii) (घ) स्थगितः<br>(iii) (ख) चतुर्थांशम्<br>(iv) (क) खिन्नाः | 4×1=4 |
| | | |
| 18. | **पठितकथा-पूर्तिः -**<br>कस्मिंश्चित् नगरे चन्द्रः (i) **नामकः** एकः भूपतिः अवसत्। तस्य पुत्राः वानरक्रीडारताः प्रतिदिनं वानरसमूहं (ii) **विविधैः** भोज्यपदार्थैः सन्तुष्टं कुर्वन्ति स्म। तत्रैव राजगृहे बालवाहनयोग्यं मेषयूथमपि (iii) **आसीत्**। तत्र एकः मेषः जिह्वायाः लोलुपतावशात् अहर्निशं महानसं प्रविश्य तत्र यद् वस्तु पश्यति तदेव (iv) **खादति** स्म ततः पाचकाः यत्किञ्चित् काष्ठं मृत्तिकापात्रं कांस्यपात्रं ताम्रपात्रं वा पश्यन्ति स्म, तेन एव शीघ्रं ताडयन्ति स्म। मेषस्य सूपकाराणां च (v) **कलहं** दृष्ट्वा बुद्धिमान् वानरयूथपतिः अचिन्तयत्- "एतेषां कलहो (vi) **वानराणां** हिताय नास्ति।" एवं चिन्तयित्वा सः सर्वान् वानरान् आहूय एकान्ते अवदत्- (vii) **भोः बान्धवाः!** प्रतिदिनं मेषेण सह सूपकाराणाम् अयं कलहः नूनम् अस्माकं विनाशस्य कारणं भविष्यति अतः वयत् एतत् (viii) **राजभवनं** त्यक्त्वा वनं गच्छामः। तस्य इमं परामर्शम् अश्रद्धेयं मत्वा रसनास्वादलुब्धाः वानराः गन्तुं सिद्धाः न अभवन्। | 8×½=4 |

-------------0000--------------